# साहित्यशास्त्रे अनुमानम्

**Prof. A. SUBRAMONIA IYER,**
H.O.D. SANSKRIT,
SREE SANKARA COLLEGE, KALADY.

रसभावादीनामनुमितिविषयत्वमङ्गीकृत्य ध्वनिवादं केचित् दूषयामासुः येषु च राजानकमहिमभट्टो प्रसिद्धः। त्रिभिर्विमर्शैः विभक्तो व्यक्तिविवेकनाम्ना प्रथितो अस्य ग्रन्थः साहित्यकुतुकिनां चिरपरिचितः।

काव्यस्य सारभूतोऽर्थः रस एवेत्यत्र महिमभट्टो न विप्रतिपद्यते। यदाह- 'काव्यस्यात्मनि संज्ञिनि रसादिरूपे न कस्यचिद्विमति'रिति। काव्यसन्दर्भे शब्दानां व्यञ्जनानामापरोऽयं व्यापारो नाभ्युपगन्तव्यः। वस्त्वलङ्काररसादिरूपस्त्रिविधोऽपि व्यङ्ग्यत्वेनाभिमतोऽर्थोनुमेय एवेति अस्य दृढोऽभिप्रायः। तं च त्रिभिर्विमर्शैः प्रतिपादयामास स्पष्टम्। तेषु प्रथमस्मिन् ध्वनिलक्षणस्य तद्भेदानाञ्चानुमानेऽन्तर्भावमुपपाद्य, द्वितीये काव्यदोषानाख्याय तृतीयेन ध्वन्युदाहरणानाम् अनुमानविषयत्वं स्पष्टीकृतवान्।

व्यङ्ग्यप्रतिपत्तिः वाच्यप्रतीतिपूर्विकेति ध्वनिकारस्यापि अभिमतमेव। तच्च लिङ्गलिङ्गिभावमेवेति समर्थयति वाच्यप्रतीयमानयोः। अनुमितिरेव काव्ये प्राधान्यम् अर्हति। सर्व एव शाब्दो व्यवहारः अस्या एव विषयो भवति। मुख्यया वृत्त्या द्विविध एवार्थो वाच्यो गम्यश्चेति। उपचारतस्तु व्यङ्ग्यस्तृतीयोऽपि, न तु प्राधान्येन, स तु लक्षणायाः विषयः। प्राधान्येन प्रतिपिपादयिषितस्तु न ध्वनिव्यवहारयोग्यः किन्तु अनुमेयत्वेनैव व्यवहार्यः। शब्दव्यापारविषयो यो वाच्यः स एव मुख्य इत्युच्यते। तत एव तदनुमिताद्वा लिङ्गभूताद् यदर्थान्तरमनुमीयते सोऽनुमेयः। सोऽर्थः त्रिविधः वस्तुमात्रालङ्काराः रसादयश्चेति। तत्राद्यौ वाच्यावपि सम्भवतः। तृतीयस्त्वनुमेय एव। तमिममर्थं ध्वनित्वेन व्यवह्रियमाणस्य लक्षणवाक्ये बहवो दोषाः दृश्यन्ते इत्यभिप्रायः महिमभट्टस्य।

'यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।

व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।' इति ध्वनिकारेण यदुक्तं लक्षणं तत्र दशदोषाः प्रविष्टाः इति महिम्नः आशयः। अत्र अर्थस्योपसर्जनीकृतात्मत्वविशेषणं न देयम् कुत इति चेत् तस्य तदव्यभिचारात्। अर्थान्तरप्रतीतये किल स उपादीयते। यो हि यदर्थमुपादीयते नासौ तमेवोपसर्जनीकरोति। यथा जलार्थमुपादीयमानो घटः जलम्। ततः सर्वत्र अर्थस्योपसर्जनीभाव एव वाच्यस्य। तस्य स्वार्थाभिधानमन्तरेण व्यापारान्तरं नोपपद्यते। किञ्च यथा अभिधेयोऽर्थः तद्विशेषणञ्चोपात्तं तथा अभिधाप्युपादानम् अर्हत्येव। अन्यथा यत्र वाच्यालङ्कारादलङ्कारान्तरस्य प्रतीतिः तत्र ध्वनित्वमिष्टं न स्यात्।

किञ्च वाशब्दोऽत्र विकल्पार्थो वा स्यात् समुच्चयार्थो वा? न तावत् विकल्पार्थः पक्षान्तराभावात्। समुच्चयार्थत्वे यत्र शब्दार्थयोः एकैकस्य व्यञ्जकत्वं तत्र ध्वनित्वमिष्टं न स्यात्। किञ्च प्रतीयमानस्य तमिति पुंस्त्वेन निर्देशोऽप्यनुपपन्नः। अनन्तरं प्रक्रान्तार्थपरामर्शिनः तल्लिङ्गता हि युक्ता। अनन्तरं च नपुंसकलिङ्गेनार्थो

निर्दिष्टोऽस्ति 'प्रतीयमानं पुनरन्यदेव' इति ध्वनिग्रन्थे। 'सरस्वती स्वादु तदर्थवस्तु' इत्यादिना च। अपि च काव्यस्य विशिष्टत्वम् अनुपपन्नम्। काव्यसामान्यस्य ध्वनिव्यपदेशविषयत्वेनेष्टत्वात्। इत्येवमादीन् दोषानुद्भाव्य ध्वनिलक्षणवाक्यस्य अविकलं स्वरूपमेवाह-

वाच्यस्तदनुमितो वा यत्रार्थोर्थान्तरं प्रकाशयति।
संबन्धतः कुतश्चित् सा काव्यानुमितिरित्युक्ता।।

एवं ध्वनिलक्षणस्यानुमितिरूपत्वमुपपाद्य तद्भेदानामप्यनुमाने अन्तर्भावमाचचक्षे। अविवक्षितवाच्यत्वं विवक्षितान्यपरवाच्यश्चेति ध्वनेः प्रकारद्वयकल्पनमपि असमञ्जसमिति महिम्नः आशयः। अर्थान्तरसंक्रमितवाच्यस्य उदाहरणमपि गुणवृत्तेरेव सङ्गच्छते। अतस्तस्यानुमाने एवान्तर्भावः। शब्दशक्तिमूलानुरणनव्यङ्ग्यस्तु न संभवत्येव, शब्दस्य अभिधाशक्तिव्यतिरेकेण शक्त्यन्तराभावात्। अर्थशक्तिमूलत्वं तु धूमादिवाग्नेः संबन्धावधारणपुरःसरीकारेण ततो अर्थान्तरप्रतीतेः।

एवं विभावादिभ्यो रसादीनां प्रतीतिरपि अनुमान एव अन्तर्भवति। विभावादिप्रतीतिस्तु तत्र रसादिप्रतीतेः साधनमिष्यते। विभावानुभावव्यभिचारिणो हि रत्यादीनां भावानां कारणकार्यसहकारिणो भवन्ति। ते च रत्यादीन् अनुमापयन्त एव रसादीन् निष्पादयन्ति। एवं प्रतीयमाने वस्तुनि अलङ्कारे वा वाच्योऽर्थः प्रतीयमानस्यार्थस्य लिङ्गभावमुपयाति। ततः सर्वस्यापि व्यङ्ग्यत्वाभिमतस्य अर्थस्य अनुमेयत्वमेव।

अयं महिमभट्टः न ध्वनेरभावमाह किन्तु भाक्तत्वमेव। तथा हि-'तस्माद् भाक्तत्वमेव द्योतकत्वमुपगन्तव्यं न मुख्यमिति'। अनेन महिम्ना विस्तरतो ध्वनेः गौणत्वे साधितेऽपि नात्र विदुषामादरः समजनि।